# श्री राजराजेश्वरी मंत्रमातृका स्तवः

कल्याणायुतपूर्णचंद्रवदनां प्राणेश्वरानंदिनीं
पूर्णां पूर्णतरां परेशमहिषीं पूर्णामृतास्वादिनीम् ।
संपूर्णां परमोत्तमामृतकलां विद्यावतीं भारतीं
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 1

एकारादिसमस्तवर्णविविधाकारैकचिद्रूपिणीं
चैतन्यात्मकचक्रराजनिलयां चंक्रांतसंचारिणीम् ।
भावाभावविभाविनीं भवपरां सद्भक्तचिंतामणिं
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 2

ईशाधिक्परयोगिबृंदविदितां स्वानंदभूतां परां
पश्यंतीं तनुमध्यमां विलसिनीं श्रीवैखरीरूपिणीम् ।
आत्मानात्मविचारिणीं विवरगां विद्यां त्रिबीजात्मिकां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 3

लक्ष्यालक्ष्यनिरीक्षणां निरूपमां रुद्राक्षमालाधरां
त्र्यक्षार्धाकृतिदक्षवंशकलिकां दीर्घाक्षिदीर्घस्वराम् ।
भद्रां भद्रवरप्रदां भगवतीं भद्रेश्वरीं मुद्रिणीं
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 4

© 2022 Vedam Nadam

ह्रींबीजागतनादबिंदुभरितां ओंकारनादात्मिकां
ब्रह्मानंदघनोदरीं गुणवतीं ज्ञानेश्वरीं ज्ञानदाम् ।
इच्छाज्ञानकृतीं मही गतवतीं गंधर्वसंसेवितां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 5

हर्षोन्मत्तसुवर्णपात्रभरितां पीनोन्नताघूर्णितां
हुंकारप्रियशब्दजालनिरतां सारस्वतोल्लासिनीम् ।
सारासारविचारचारुचतुरां वर्णाश्रमाकारिणीं
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 6

सर्वेशांगविहारिणीं सकरुणां सन्नादिनीं नादिनीं
संयोगप्रियरूपिणीं प्रियवतीं प्रीतां प्रतापोन्नताम् ।
सर्वांतर्गतशालिनीं शिवतनूसंदीपिनीं दीपिनीं
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 7

कर्माकर्मविवर्जितां कुलवतीं कर्मप्रदां कौलिनीं
कारुण्यांबुधिसर्वकामनिरतां सिंधुप्रियोल्लासिनीम् ।
पंचब्रह्मसनातनासनगतां गेयां सुयोगान्वितां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 8

© 2022 Vedam Nadam

हस्त्युत्कुंभनिभस्तनद्वितयतः पीनोन्नतादानतां
हाराद्याभरणां सुरेंद्रविनुतां शृंगारपीठालयाम् ।
योन्याकारकयोनिमुद्रितकरां नित्यां नवार्णात्मिकां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 9

लक्ष्मींलक्षणपूर्णभक्तवरदां लीलाविनोदस्थितां
लाक्षारंजितपादपद्मयुगलां ब्रह्मेंद्रसंसेविताम् ।
लोकालोकितलोककामजननीं लोकाश्रयांकस्थितां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 10

ह्रींकाराश्रितशंकरप्रियतनुं श्रीयोगपीठेश्वरीं
मांगल्यायुतपंकजाभनयनां मांगल्यसिद्धिप्रदाम् ।
तारुण्येन विशेषितांग सुमहालावण्यसंशोभितां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 11

सर्वज्ञानकलावतीं सकरुणां सर्वेश्वरीं सर्वगां
सत्यां सर्वमयीं सहस्रदलजां सत्त्वार्णवोपस्थिताम् ।
संगासंगविवर्जितां सुखकरीं बालार्ककोटिप्रभां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 12

© 2022 Vedam Nadam

कादिक्षांतसुवर्णबिंदुसुतनुं सर्वांगसंशोभितां
नानावर्णविचित्रचित्रचरितां चातुर्यचिंतामणिम् ।
चित्रानंदविधायिनीं सुचपलां कूटत्रयाकारिणीं
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 13

लक्ष्मीशानविधींद्रचंद्रमकुटाद्यष्टांगपीठाश्रितां
सूर्येंद्वग्निमयैकपीठनिलयां त्रिस्थां त्रिकोणेश्वरीम् ।
गोप्त्रीं गर्वनिगर्वितां गगनगां गंगांगणेशप्रियां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 14

ह्रींकूटत्रयरूपिणीं समयिनीं संसारिणीं हंसिनीं
वामाचारपरायणीं सुकुलजां बीजावतीं मुद्रिणीम् ।
कामाक्षीं करुणार्द्रचित्तसहितां श्रीं श्रींत्रिमूर्त्यंबिकां
श्रीचक्रप्रियबिंदुतर्पणपरां श्रीराजराजेश्वरीम् ॥ 15

या विद्या शिवकेशवादिजननी या वै जगन्मोहिनी
याब्रह्मादिपिपीलिकांतजगदानंदैकसंदायिनी ।
या पंचप्रणवद्विरेफनळिनी या चित्कळामालिनी
सा पायात्परदेवता भगवती श्रीराजराजेश्वरी ॥ 16

॥ इति श्री शाक्तमतसिद्धांत संस्थापन वामाचार परमाचर्यवर्य-वावदूकविद्वच्छंकरानंद विराजितः श्री राजराजेश्वरी मातृकामंत्र स्तवः संपूर्णः ॥